| Name | | Roll Number | |
|---|---|---|---|

# INDIAN SCHOOL MUSCAT
## MIDDLE SECTION
## ANNUAL EXAMINATION 2019-20

**SANSKRIT – THIRD LANGUAGE SET- B** **Code: MYSN311**

**CLASS: VII** **Time Allotted: 2 Hrs**

**27.02.2020** **Max .Marks: 80**

**MARKS OBTAINED:**

**खण्डः -क**

1. **अधोलिखित पठित नाट्यांशम् पठित्वा प्रश्नानां उत्तराणि लिखत**

**सौम्यः** मातः! भवती किं पचति?

**माता** सौम्य ! अहं मिष्टान्नानि स्वादिष्टव्यञ्जनानि च पचामि। त्वं कुत्र अगच्छः?

**सौम्यः** अहं जनकेन सह आपणात् नूतनवस्त्राणि,दीपान्, मोमवर्तिकाः च आनेतुं अगच्छम्। श्वः दीपोत्सवः भविष्यति। सर्वत्र सुन्दराःआपणाःशोभनानि च भवनानि सन्ति। अहमपि स्वगृहं भूषयिष्यामि।मातः! श्रेया कुत्र अस्ति?

**माता** श्रेया अग्रजेन सह गहं स्वच्छं करोति।

**सौम्यः** अहमपि ताभ्यां सह नवमूर्तिभिः,सुन्दरैः चित्रैः,रङ्गवल्या सज्जा सामग्रीभिश्च गृहं भूषयिष्यामि।

**I.एकपदेन उत्तरत** 4X1/2=2

(i) माता किं पचति? (ii) सौम्यः केन सह आपणम् अगच्छत् ?

(iii) श्वः किं भविष्यति ? (iv) माता कं प्रति वदति ?

1X2=2

**II.एकवाक्येन उत्तरत**

(i) सर्वत्र कानि सन्ति?

**III.**<u>**यथा निर्देशानुसारं लिखत**</u> 4X1/2=2

(i) **अगच्छम् -** अत्र लकारः किम्**?**

(ii) **अनुजः –** पदस्य विलोमपदं किम्**?**

(iii) **शोभनानि भवनानि -**पदस्य विशेषणपदं किमस्ति**?**

(iv) **चित्रैः –** का विभक्तिः **?**

2. <u>**अधोलिखित नाट्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत**</u>

**अध्यापकः** शोभनम् । एवमेव चत्वारः उपवेदाः सन्ति यथा आयुर्वेदः,धनुर्वेदः,सामवेदः,अर्थशास्त्रं च । उपवेदेषु प्रथमः आयुर्वेदः मनुष्याणां स्वास्थ्यलाभाय सर्वोत्तमः हेतुः अस्ति।

**अश्विनः** आयुर्वेदस्य आरम्भः कदा अभवत् **?**

**अध्यापकः** श्रुणु तावत्,अनन्तकालात् देवाः ऋषयः च आयुर्वेदस्य प्रचारं अकुर्वन् । मनुष्यलोके तु धन्वन्तरिः अस्य प्रथमः प्रचारकः मन्यते । तदन्तरं चरक-सुश्रुत-वाग्भट्टादयः-आयुर्वेदस्य प्रसिद्धाः आचार्याः अभवन् । तेषां कथनं च –" आयुर्वेदस्य नियमानां पालनेन मानवः सुखेन शतवर्षाणि यावत् स्वस्थं जीवनं यापयति।'

**I.**<u>**एकपदेन उत्तरत**</u> 4X1/2=2

(i) कति उपवेदाः सन्ति**?**

(ii) मनुष्यलोके कः अस्य प्रथमः प्रचारकः मन्यते **?**

(iii) मानवः सुखेन कति वर्षाणि यावत् स्वस्थं जीवनं यापयति **?**

(iv) आयुर्वेदस्य प्रसिद्धाः आचार्याः के अभवन्**?**

1X2=2

**II.**<u>**एकवाक्येन उत्तरत**</u>

(i) उपवेदानाम् नामानि कानि**?**

**III.**<u>**यथा निर्देशानुसारं लिखत**</u> 4X1/2=2

(i) **अकुर्वन्** -अत्र लकारः किम् **?**

(ii) **मुनयः** – पदस्य पर्यायपदं किम्**?**

(iii) **प्रथमः प्रचारकः** -अत्र विशेषणपदं किमस्ति**?**

(iv)**तेषाम्** –अत्र का विभक्तिः **?**

3. **अधोलिखित संस्कृतपदानां आंगलार्थं लिखत** 5X1=5

(i)प्रतिवेशी (ii) आमलकम् (iii) शिरस्त्राणम् (iv) प्रसिद्धः (v)आपणात्

4. **मञ्जूषातः रिक्तस्थान पूर्तिः क्रियताम्** 1X3=3

**(शान्तिभङ्गम्,पथ्यपालनेन,स्फोटकाः)**

(i) मनुष्यः---------- सर्वथा स्वस्थः भवति।

(ii)कपोतः------- न इच्छति।

(iii)----------- हानिकारकाःभवन्ति।

5. **विलोमपदानि लिखत** 5X1=5

(i)सुखम् (ii) दीर्घायुः (iii)शान्तिः (iv) अधिकम् (v) उचितम्

6. **पर्यायपदानि लिखत** 5X1=5

(i) परन्तु (ii) इच्छति (iii) उत्सवः (iv) स्पर्धा (v) राजा

7. **अधोलिखित रेखाङ्कितपदानां कोष्ठकात् उचित प्रश्ननिर्माणं कुरुत** 5X1=5

**(केन, कुत्र, कः,कानि,कस्याम्)**

(i) माता **व्यञ्जनानि** पचति।

(ii) सौम्यः **आपणम्** गच्छति ।

(iii) श्रेया **अग्रजेन** सह गृहम् भूषयति।

(iv) **बालः** नूतनवस्त्रम् धारयति।

(v) नृपः **आसन्दिकायां** उपविशति ।

**खण्डः-ख**

8. **संस्कृतभाषायां अनुवादं कुरुत** 5X1=5

(i) My father is going to office.


(ii) This is a book.

(iii) We both cook.

(iv) A boy writes with pen.

(v) Radha is running in the garden.

9. **अधोदत्तचित्रं दृष्ट्वा मञ्जूषां उपयुज्य पञ्च संस्कृत वाक्यानि लिखत** 5X1=5



**(उद्यानस्य,केचन,क्रीडन्ति, उद्याने,वृक्षाः,भ्रमणम्, मालाकारः,प्रसन्नाः,वृक्षाः, पुष्पाणि,बालकाः)**

**खण्डः-ग**

10. **अधोलिखित संख्यानां नामानि संस्कृत भाषायां लिखत** 1X5=5

(i) 56 (ii) 48 (iii) 59 (iv) 43 (v) 60

11. **मञ्जूषातः उचित अव्ययपदं चित्वा रिक्तस्थानानि पूरयत** 5X1=5

**(कुत्र, एव, च,नीचैः. श्वः)**

(i) रामः सीता ------------ वार्तालापं कुरुतः।

(ii) ---------------- विद्यालये परीक्षा भविष्यति।

(iii) बालः दुग्धम्------- पिबति।

(iv) त्वं -------------भ्रमसि? ।

(v)जलम्--------------पतति।

12. **प्रदत्त विकलपेभ्यः उचित धातुरूपं चित्वा रिक्तस्थान पूर्तिः क्रियताम्** 5X1=5

(i)बालकाः पुस्तकानि -----------। (नय्,लोट्)

(अ) नयतु (आ)नयताम् (इ) नयन्तु

(ii)युवाम् भोजनं समये--------------- । (खाद्,लोट्)

(अ) खादत (आ) खादतम् (इ) खाद

(iii) पुष्पाणि वृक्षात् -------------- । (पत्, लोट्)

(अ)पततु (आ) पतताम् (इ) पतन्तु

(iv)अहम् श्वःपरीक्षां --------------। (लिख्, लोट्) )

(अ)लिखानि (आ) लिखाव (इ) लिखाम

(v) महिला भोजनं --------------।

(अ) पचन्तु (आ) पचताम् (इ) पचतु

13. **<u>प्रदत्त विकलपेभ्यः उचित शब्दरूपं चित्वा रिक्तस्थान पूर्तिः क्रियताम्</u>** 6X1=6

(i) ---------------- बालकः अस्ति । (तत्)

(अ) ते (आ) ताः (इ) सः

(ii) जनाः----------------कार्यम् कुर्वन्ति । (मतिः)

(अ) मत्या (आ) मतिः (इ) मतिम्

(iii)------------- नाम रामः अस्ति। (तद्)

(अ) सः (आ) ते (इ) तस्य

(iv)------------- स्नानं कुर्वन्ति। (नदी)

(अ)नद्याः (आ) नद्याम् (इ) नदीः

(v) ------------ कक्षायाम् चत्वारिंशत् छात्राः पठन्ति। (तत्)

(अ) तस्य (आ) तस्याः (इ) तस्याम्

(vi) भारते अनेके ------------ सन्ति। (नदी)

(अ) नदी (आ) नद्यौ (इ) नद्यः

14. **<u>अधोलिखित पदानां प्रकृति-प्रत्ययं संयोज्य विभज्य वा लिखत</u>** 4X1=4

(i) गम्+ तुमुन् (ii) ज्ञात्वा (iii) कृ+तुमुन् (iv) लिख्+ क्त्वा

.

**<u>खण्डः-घ</u>**

15. **<u>अधोलिखित अपठित गद्यांशं पठित्वा प्रश्नानां उत्तराणि लिखत</u>**

विद्यायाः विचित्रः महिमा वर्तते। विद्याधनं सर्वधनप्रधानं अस्ति। इदं व्ययकृतं अपि क्षीणं न भवति व्यये कृते विद्यायाः वृद्धिः एव भवति। विद्वांसः अपूर्वं सुखं लभन्ते। विद्या विनयं ददाति। विनयात् जनः पात्रताम्,ततः च धनं धर्मं सुखमपि च प्राप्नोति। विद्वांसः तु परदेशेषु अपि सम्मानं लभन्ते। विद्याहीनः नरः

पशुतुल्यः भवति। अतः आत्मकल्याणाय परेषां च हिताय नरैः विद्याभ्यासः करणीयः॥

**I.<u>एकपदेन उत्तरत</u>** 4X1=4

(i) किं सर्वधनप्रधानं अस्ति? (ii) विद्वांसः कीदृशं सुखं लभन्ते ?

(iii) विद्या किं ददाति? (iv) विद्याहीनः नरः कीदृशः भवति?

**II.<u>एकवाक्येन उत्तरत</u>** 2X2=4

(i)विनयात् जनः किं किं प्राप्नोति ? (ii) विद्याभ्यासः किमर्थं करणीयः?

**III.<u>यथा निर्देशानुसारं लिखत</u>** 4×½=2

(i)**हिताय-** का विभक्तिः ?

(ii) **अस्ति–** पदस्य कः लकारः?

(iii) **सुखम्-** पदस्य विलोम पदं किम्?

(iv) **अपूर्वं सुखं** –अत्र किं विशेषणपदं अस्ति?

End of the question Paper.